योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१५

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२
सर्गः ११६
सर्गः ५३
सर्गः ११७
सर्गः ५४
सर्गः ११८
सर्गः ५५
सर्गः ११९
सर्गः ५६
सर्गः १२०
सर्गः ५७
सर्गः १२१
सर्गः ५८
सर्गः १२२
सर्गः ५९
सर्गः १२३
सर्गः ६०
सर्गः १२४
सर्गः ६१
सर्गः १२५
सर्गः ६२
सर्गः १२६
सर्गः ६३
सर्गः १२७
सर्गः ६४
सर्गः १२८

पञ्चदशः सर्गः १५

श्रीवसिष्ठ उवाच ।

कुसुमापूर्णकल्पाभ्रकुन्तले तस्य मूर्धनि ।

कल्पाङ्गमहमद्राक्षं शाखाचक्रमिव स्थितम् ।। १

पुष्परेण्वभ्रवलितं रत्नस्तबकदन्तुरम् ।

उत्सेधनिर्जिताकाशं शृङ्गे शृङ्गमिवार्पितम् ।। २

ताराद्विगुणपुष्पौघं मेघद्विगुणपल्लवम् ।

रश्मिद्विगुणरेण्वभ्रं तडिद्द्विगुणमञ्जरीम् ।। ३

स्कन्धेषु किन्नरीगीतद्विगुणभ्रमरस्वनम् ।

दोलालोलाप्सरोलोकद्विगुणीकृतपल्लवम् ।। ४

सिद्धगन्धर्वसंघातद्विगुणोत्थविहंगमम् ।

रत्नकान्त्यच्छनीहारद्विगुणत्वग्वृतांशुकम् ।। ५

चन्द्रबिम्बसमाश्लेषद्विगुणाङ्गबृहत्फलम् ।

मूलसंलीनकल्पाभ्रद्विगुणीकृतपर्वकम् ।। ६

सुरसंवलितस्कन्धं पत्रविश्रान्तकिन्नरम् ।

निकुञ्जकुञ्जजीमूतं कच्छसुप्तसुरादिकम् ।। ७

स्वाकारविपुलं भृङ्गानुत्सार्य वलयस्वनैः ।

अप्सरोभ्रमरीभिश्च गृहीतकुसुमान्तरम् ।। ८

सुरकिंनरगन्धर्वविद्याधरवरान्वितम् ।

जगज्जालमिवानन्तदशाशाकाशपूरकम् ।। ९

नीरन्ध्रकलिकाजालं नीरन्ध्रमृदुपल्लवम् ।

नीरन्ध्रविकसत्पुष्पं नीरन्ध्रवनमालितम् ।। 6.1.15.१०

नीरन्ध्रमञ्जरीपुञ्जं नीरन्ध्रमणिगुच्छकम् ।

नीरन्ध्रांशुकरत्नाढ्यं लताविलसनाकुलम् ।। ११

सर्वत्र कुसुमापूरैः सर्वत्र फलपल्लवैः ।

सर्वामोदरजःपुञ्जैः परं वैचित्र्यमागतम् ।। ११

तस्य कक्षेषु कुञ्जेषु लतापत्रेषु पर्वसु ।

पुष्पेष्वालयसंलीनान्विहगान्दृष्टवानहम् ।। १३

निशानाथकलाखण्डमृणालशकलैधितान् ।

अर्जुनाम्भोजिनीकन्दकवलान्ब्रह्मसारसान् ।। १४

विरंचेरथ हंसानां पोतकान्सामगायिनः ।

ॐकारवेदसुहृदो ब्रह्मविद्यानुशासनान् ।। १५

उद्गीर्णमन्त्रनिचयान्स्वाहाकारनिभस्वनान् ।

अस्थिनैकतडित्पुञ्जनीलमेघसमोपमान् ।। १६

देवैर्निरीक्षितान्नित्यं यज्ञवेदिलतादलान् ।

शुकान्कार्शानवाञ्छयामाञ्छिशूञ्छिखिशिखाशिखान् ।। १७

गौरीरक्षितबर्हौघान्कौमारान्वरबर्हिणः ।

स्कन्दोपन्यस्तनिःशेषशैवविज्ञानकोविदान् ।। १८

व्योम्नैव जातनष्टानां महतां व्योमपक्षिणाम् ।

बन्धूनाबद्धनिलयाञ्छरदभ्रसमाकृतीन् ।। १९

विरंचिहंसजानन्यानन्यानग्निशुकोद्भवान् ।

कौमारबर्हिजानन्यानन्यानम्बरपक्षिजान् ।। 6.1.15.२०

द्वितुण्डांश्च भरद्वाजान्हेमचूडान्विहंगमान् ।

कलविङ्कबलान्गृध्रान्कोकिलान्क्रौञ्चकुक्कुटान् ।। २१

भासचाषबलाकादीन्बहूनन्यांश्च राघव ।

भूतौघं जगतीवाहं दृष्टवांस्तत्र पक्षिणः ।। २२

दक्षिणस्कन्धशाखायां स्थितायां वै दवीयसि ।

अथाहं दृष्टवान्पुष्टपत्रायामम्बरस्थितः ।। २३

काले काकोलवलयं मञ्जरीजालमालितम् ।

लोकालोकाचलेऽरण्ये कल्पाभ्रौघमिव स्थितम् ।।२४

तत्र पश्याम्यहं यावदेकान्ते स्कन्धकोटरे ।

विचित्रकुसुमास्तीर्णे विविधामोदशालिनि ।। २५

पुण्यकृद्योषितां स्वर्गे प्रियस्तबकवासिताः ।

अपरिक्षुभिताकाराः सभायां वायसाः स्थिताः ।। २६

विभेद्यमेघा वातेन समेनेवापसारिताः ।

तेषां मध्ये स्थितः श्रीमान्भुशुण्डः प्रोन्नताकृतिः ।।२७

मध्ये च काचखण्डानामिन्द्रनील इवोन्नतः ।

परिपूर्णमना मानी समः सर्वाङ्गसुन्दरः ।। २८

प्राणस्पन्दावधानेन नित्यमन्तर्मुखः सुखी ।

चिरंजीवीति विख्यातश्चिरजीवितया तया ।। २९

जगद्विदितदीर्घायुर्भुशुण्ड इति विश्रुतः ।

युगागमापायदशादशनप्रौढमानसः ।। 6.1.15.३०

प्रतिकल्पं च गणयन्खिन्नश्चक्रपरम्पराम् ।

जन्मनां लोकपालानां शर्वशक्रमरुत्वताम् ।। ३१

संस्मर्ता समतीतानां सुरासुरमहीभृताम् ।

प्रसन्नगम्भीरमनाः पेशलः स्निग्धमुग्धवाक् ।। ३२

अव्यक्तवक्ता विज्ञाता निर्ममो निरहंकृतिः ।

सुहृद्बन्धुस्तथा मित्रं मृत्युपुत्रो गुरुप्रभुः ।

सर्वदा सर्वथा सत्यं सर्वं सर्वस्य संस्तवे ।। ३३

सौम्यः प्रसन्नमधुरो रसवान्महात्मा

हृद्यः सरोवर इवान्तरखण्डशैत्यः ।

हृत्पुण्डरीककुहरं व्यवहारवेत्ता

गाम्भीर्यमच्छमजहात्प्रकटाशयश्रीः ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भुशुण्डोपाख्याने भुशुण्डदर्शनं नाम पञ्चदशः सर्गः ।। १५ ।।